# धीराः

1. चलन्ति गिरयः कामं युगान्तपवनाहताः ।
कृच्छ्रे पि न चलत्येव धीराणां निश्चलं मनः ।।

2. एकेनापि शूरेण पदाक्रान्तं महीतलं ।
क्रियते भास्करेणैव स्फारस्फुरिततेजसा ।।

3. सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ।
प्रकृतिरयं सत्ववतां न खलु वयस्तेजसां हेतुः ।।

4. निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु मा यथेष्टं ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ।।

5. दर्शितभये पि धातरि धैर्यध्वंसो भवन्ने धीराणां ।
शोषितसरसि निदाघे नितरामेवोद्धतः सिन्धुः ।।

6. सञ्चये च विनाशे च मरणान्ते च जीविते ।
संयोगे च वियोगे च को नु विप्रणयेन्मनः ।।